# कक्षा – द्वादशी

## संस्कृतम् (ऐच्छिकम्) कोड सं. – (022)

## अङ्कयोजना उत्तरसङ्केताश्च - 2024-25

**समयः – होरात्रयम्** **पूर्णाङ्काः – 80**

**अवधातव्यम् -**

1. अस्याम् अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः दातुं शक्यन्ते तादृशानां प्रश्नानां मूल्याङ्कनं करणीयम्।** यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि शुद्धानि, तेषां मूल्याङ्कनं करणीयम्। **(अयं नियमः एकादश्यां कक्षायाम् अपि पालनीयः।)**
3. अनुच्छेदे श्लोके वा आधारिताः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः अनुच्छेदे प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरदान-समये समुचितानां विभक्तीनां वचनानां प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. 'ख' खण्डे (रचनात्मक-कार्ये) वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।
7. **प्रश्ननिर्माणस्य प्रश्ने ½ अङ्कः वाक्यलेखनाय अस्ति, ½ अङ्कश्च प्रश्नवाचकचिह्नाय। परं सम्यक्-प्रश्ननिर्माणं यदा स्यात्तदा एव प्रश्नवाचकचिह्नस्य कृते अङ्काः प्रदेयाः।**

### खण्डः - 'क'

### अपठित-अवबोधनम् 10 अङ्काः

| | | |
|---|---|---|
| 1. | अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत –<br>(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)<br>(क) वैद्यः<br>(ख) गुरुकुलवासिनाम्<br>(ग) सुविख्यातम् | 10<br>1×2=2 |
| | (आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)<br>(क) गुरुकुले सर्वे तदा भोजनं कुर्वन्ति, यदा ते तीव्रक्षुधाम् अनुभवन्ति। यदा तेषां भोजनेन तृप्तिः भवति, ततः पूर्वम् एव ते भोजनं त्यजन्ति। एतदेव गुरुकुलवासिनां | 2×2=4 |

| | | |
|---|---|---|
| | स्वास्थ्यस्य रहस्यम् अस्ति।<br>(ख) छात्राः गुरुकुले विविधविद्यापारङ्गतेभ्यः गुरुभ्यः अनेकान् विषयान् पठन्ति स्म।<br>(ग) अस्वस्थाः/ रुग्णाः नराः औषधं सेवन्ते। | |
| | (इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत-<br>यत्र रोगः तत्र वैद्यः / स्वास्थ्यस्य रहस्यम् अथवा अन्यदपि किमपि समुचितं शीर्षकं छात्राः लेखितुं शक्नुवन्ति। | 1 |
| | (ई) निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत- (केवलं प्रश्नत्रयम्)<br>(क) (ii) भवान्<br>(ख) (iv) स्वस्थाः<br>(ग) (i) संस्था<br>(घ) (ii) अस्ति | 1×3=3 |
| | | |
| | **खण्डः - 'ख'**<br>**रचनात्मक–कार्यम्** **10 अङ्काः** | |
| 2. | भवती वरेण्या बैंगलूरूनगरे एकस्मिन् छात्रावासे वसति। मात्रा लिखितपत्रेण भवती ज्ञातवती यद् भवदनुजः ऋतांशः चलभाषियन्त्रस्य अतिप्रयोगं करोति। अस्य यन्त्रस्य अतिप्रयोगः सर्वथा हानिकरः एव इति तं बोधयितुं मञ्जूषायां प्रदत्तसङ्केतानां सहायतया अनुजं प्रति पत्रमेकं लिखतु।<br>**अथवा**<br>भवान् उद्गीथः द्वादशकक्षायाः छात्रः अस्ति। स्वविद्यालये संस्कृतसम्भाषण–शिविरम् आयोजयितुम् इच्छति। एतदर्थम् अनुमतिं प्राप्तुं प्रधानाचार्यं प्रति मञ्जूषायां प्रदत्तसङ्केतानां सहायतया पत्रमेकं लिखत ।<br>छात्राः पूर्णं पत्रं लेखिष्यन्ति। शुद्धपत्राय पूर्णाङ्काः प्रदेयाः। व्याकरणसम्बद्ध–दोषेभ्यः आंशिकरूपेणैव अङ्काः कर्तनीयाः न तु पूर्णाः। | 1×5=5 |
| | | |
| 3. | प्रदत्ततथ्यानां सहायतया अधोलिखितं विषयम् अधिकृत्य संस्कृतेन अनुच्छेदं लिखत –<br>विषयम् आधृत्य छात्राः सरलम् अनुच्छेदं लेखिष्यन्ति। विषयसम्बद्धतायै 2½ अङ्काः भाषिकशुद्धतायै च 2½ अङ्काः दातव्याः।<br>**अथवा**<br>हिन्दीभाषया आङ्ग्लभाषया वा लिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत।<br>1. भारतस्य वीरसैनिकाः देशरक्षायै सदा तत्पराः भवन्ति।<br>2. बाल्यकाले सर्वे बालकाः विद्यालयं गत्वा अध्ययनं कुर्युः।<br>3. सर्वे छात्राः कठिनं परिश्रमं कृत्वा सफलताम् अलभन्त। | 5 |

www.careerindia.com

| | | | |
|---|---|---|---|
| | 4. शिष्याः आचार्यात् व्याकरणशास्त्रं पठिष्यन्ति।<br>5. यूयं गृहं परितः वृक्षान् आरोपयत।<br>6. सः अश्वः एकेन पादेन खञ्जः आसीत्।।<br>7. भवन्तः कस्मिन् विद्यालये पठन्ति? / भवान् कस्मिन् विद्यालये पठति? | |
| | | |
| | **खण्डः - 'ग'**<br>**अनुप्रयुक्त–व्याकरणम् 15 अङ्काः** | |
| | | |
| 4. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (केवलं प्रश्नत्रयम्)**<br>(क) अन्धन्तमः प्रविशन्ति **ये + अविद्याम्** उपासते।<br>(ख) **रघोरुदारामपि** गां निशम्य।<br>(ग) कवचिनो दण्डिनो **निषङ्गिणः + च** रक्षितारः।<br>(घ) कुमार! **कृतं कृतमश्वेन**। | 1x3=3 |
| | | |
| 5. | **रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नत्रयम्)**<br>(क) (i) अर्ह्+शतृ<br>(ख) (iii) उपदेष्टारः<br>(ग) (iv) कर्मसङ्ग + णिनि<br>(घ) (ii) घोरा | 1x3=3 |
| | | |
| 6. | **मञ्जूषायां प्रदत्तैः समुचितैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि लिखत। (केवलं प्रश्नत्रयम्)**<br>(क) जगदेकनाथः रघुः कौत्सं **भूयः** अकथयत्।<br>(ख) **श्वः** क्रियमाणं कार्यम् अद्यैव समापयेत्।<br>(ग) पुत्तलिकायाः वचनं श्रुत्वा राजा **तूष्णीम्** अभवत्।<br>(घ) अथ परितो पर्वतश्रेणीव मेघमाला **सहसा** प्रादुरभूत्। | 1x3=3 |
| | | |
| 7. | **कोष्ठके प्रदत्तशब्देषु समुचितां विभक्तिं प्रयुज्य वाक्येषु रिक्तस्थानानि पूरयत। (केवलं प्रश्नत्रयम्)**<br>(क) अहं **गमनात्** पूर्वं तव दर्शनम् इच्छामि। (गमन)<br>(ख) अलम् **चिन्तया**। (चिन्ता)<br>(ग) अश्वारोही **स्वकार्यात्** न विरमति। (स्वकार्य) | 1x3=3 |

www.careerindia.com

| | | |
|---|---|---|
| | (घ) धनं **दानं/ दानेन/ दानात्** विना सफलं न भवति। (दान) | |
| | | |
| 8. | अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं विग्रहं समस्तपदं वा चित्वा लिखत। (केवलं प्रश्नत्रयम्)<br>(क) (ii) योगस्य शिक्षा<br>(ख) (i) सविस्तरम्<br>(ग) (iv) महान् उत्साहः यस्य सः<br>(घ) (iii) सुकृतदुष्कृते | 1×3=3 |
| | | |
| | **खण्डः - (घ)**<br>(i) **पठितावबोधनम् 25 अङ्काः** | |
| | | |
| 9. | अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –<br><br>(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) शिल्पिभिः<br>(ii) जलमध्ये<br>(iii)सर्वस्वदक्षिणम्<br>(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम् )<br>(i) ब्राह्मणः उज्जयिनीं यावत्प्रत्यागच्छति तावद्देदीप्यमानशरीरः समुद्रो ब्राह्मणरूपी सन् तमागत्यावदत्।<br>(ii) राज्ञा यज्ञार्थं देवमुनिगन्धर्वयक्षसिद्धादयश्च समाहूताः।<br>(iii) ब्राह्मणः गन्धपुष्पादिषोडशोपचारं विधायाब्रवीत् "भोः समुद्र! विक्रमार्को राजा यज्ञं करोति। तेन प्रेषितोऽहं त्वामाह्वातुं समागतः।"<br>(इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)<br>(i) समुद्रः<br>(ii) गत्वा<br>(iii) सर्वस्वदक्षिणम् | 5<br><br>½×2=1<br><br><br><br>1×2=2<br><br><br><br><br>1×2=2 |
| | | |
| 10. | अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत -<br>(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) कौत्सेन<br>(ii) भक्तिम्<br>(iii) विद्या | 5<br>½×2=1 |

www.careerindia.com

| | | |
|---|---|---|
| | (आ) पूर्णवाक्येन उत्तरत – ( केवलं प्रश्नद्वयम् )<br>(i) कौत्सेन गुरुदक्षिणायै महर्षिः निवेदितः।<br>(ii) महर्षिः अस्खलितोपचारां भक्तिम् अगणयत्।<br>(iii) समाप्तविद्यः कौत्सः महर्षिं गुरुदक्षिणायै न्यवेदयत्।<br>(इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)<br>(i) अगणयत्<br>(ii) भक्तिम्<br>(iii) विज्ञापितः | 1×2=2<br><br><br><br>1×2=2 |
| | | |
| 11. | अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –<br>(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) कथयितव्यम्<br>(ii) कौशल्या<br>(iii) अश्वः<br>(आ) पूर्णवाक्येन उत्तरत – ( केवलं प्रश्नद्वयम् )<br>(i) भगवतः सुगृहीतनामधेयस्य वाल्मीकेः।<br>(ii) 'अश्वोऽश्वः' इति नाम पशुसमाम्नाये साङ्ग्रामिके च पठ्यते।<br>(iii) बटुभिः अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते।<br>(इ) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)<br>(i) जात<br>(ii) अश्वः<br>(iii) जात! | 5<br>½×2=1<br><br><br><br>1×2=2<br><br><br><br>1×2=2 |
| | | |
| 12. | अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – (केवलं प्रश्नचतुष्टयम्)<br>(क) अहम् आश्रमस्य सर्वविधम् **<u>किं</u>** प्रेषितवती?<br>(ख) **<u>काभिः</u>** द्विगुणितो महान्धकारः?<br>(ग) भवन्तः **<u>केषां</u>** प्रत्यक्षमनुभवं विधास्यन्ति?<br>(घ) **<u>केषु</u>** अत्यासङ्गः पुरुषं नाशयति?<br>(ङ) राज्ञा सर्वोऽपि ब्राह्मणसमूहो **<u>कया</u>** तोषितः? | 1×4=4 |
| | | |
| 13. | अधोलिखितस्य श्लोकस्य अन्वयं लिखत।<br>(नरः) कर्माणि कुर्वन् एव इह शतं समाः जिजीविषेत्। इतः अन्यथा नास्ति, एवं त्वयि नरे कर्म न लिप्यते। | 3 |
| | | |

www.careerindia.com

| | | |
|---|---|---|
| 14. | अधोलिखितस्य श्लोकस्य भावार्थं संस्कृतभाषया लिखत।<br>छात्राः श्लोकस्य भावार्थं संस्कृतेन स्वयं लेखिष्यन्ति। समुचितभावार्थाय पूर्णाः अङ्काः प्रदेयाः।<br>व्याकरणिकाशुद्धीनां कृते आंशिकरूपेण अङ्काः कर्तनीयाः।<br>**अथवा**<br>'कार्यं वा साधयेयम्, देहं वा पातयेयम्' इति पाठम् आधृत्य शिववीरचरस्य चरित्रचित्रणं छात्राः सङ्क्षेपेण संस्कृतभाषया लेखिष्यन्ति। समुचिततथ्यानां कृते पूर्णाः अङ्काः प्रदेयाः।<br>व्याकरणिकाशुद्धीनां कृते आंशिकरूपेण अङ्काः कर्तनीयाः। | 3 |
| | | |
| | **खण्डः - (घ)**<br>**(ii) संस्कृत–साहित्येतिहासस्य सामान्यः परिचयः 10 अङ्काः** | |
| | | |
| 15. | अधोलिखितप्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नत्रयम्)<br>(क) (iii) अश्वघोषः<br>(ख) (i) द्वाविंशतिः<br>(ग) (ii) काशीनाथमिश्रः<br>(घ) (iv) रामायणम् | 1×3=3 |
| | | |
| 16. | प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नत्रयम्)<br>(क) (iv) सुबन्धुः<br>(ख) (iii) चन्द्रापीडम्<br>(ग) (i) गद्यम्<br>(घ) (ii) कविकर्णपूरः | 1×3=3 |
| | | |
| 17. | प्रदत्तविकल्पेभ्यः समुचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)<br>(क) (i) दश<br>(ख) (iii) चतुर्थः<br>(ग) (iv) मृच्छकटिकस्य<br>(घ) (ii) मुद्राराक्षसम्<br>(ङ) (iii) कृष्णमिश्रः | 1×4=4 |
| | | |

www.careerindia.com

CAREERINDIA

| | | |
|---|---|---|
| | **खण्डः -'ङ'**<br>**छन्दोऽलङ्कारपरिचयः - 10 अङ्काः** | |
| | | |
| 18. | (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत। (केवलं प्रश्नत्रयम्)<br>(क) ।ऽऽ<br>(ख) ननमयययुतेयं मालिनी भोगिलोकैः<br>(ग) पापान्निवारयति योजयते हिताय, गुह्यं निगूहति गुणान् प्रकटीकरोति।<br>(घ) ……. यमनसभलागः ………. ।<br>(आ) अधोलिखितश्लोकपङ्क्तिषु प्रयुक्तं छन्दः परिचीय तस्य नाम लिखत। (केवलं प्रश्नद्वयम्)<br>(क) अनुष्टुप्<br>(ख) उपजातिः<br>(ग) शिखरिणी | 1×3=3<br><br><br><br><br>1×2=2 |
| | | |
| 19. | (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत। (केवलं प्रश्नत्रयम्)<br>(क) वर्णसाम्यमनुप्रासः<br>(ख) ………….. अभिधाने श्लेष उच्यते।<br>(ग) पतितैः पतमानैश्च पादपस्थैश्च मारुतः।<br>कुसुमैः पश्य सौमित्रे! क्रीडन्निव समन्ततः॥<br>(घ) साधर्म्यमुपमा भेदे।<br>(आ) अधोलिखितासु श्लोकपङ्क्तिषु प्रयुक्तालङ्कारस्य नाम लिखत। (केवलं प्रश्नद्वयम्)<br>(क) रूपकम्<br>(ख) उपमा<br>(ग) अनुप्रासः | 1×3=3<br><br><br><br><br><br>1×2=2 |

***********************************

www.careerindia.com